Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४६९८

Title स्नान विधि भाष्यम्

Author ×

Extent ४ पत्राणि Age ×

Subject धर्मशास्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

स्नानविधिभाष्यम्

४६१८

4618

F. = 4

© Dharmartha Trust J&K. Digitized by eGangotri

स्नानविधिपद्धतिः

१५०

मा।देवकल्याव

स्नानविधिपद्धतिप. ३

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ नमः सामवेदाय॥ अथ स्नानविधिनाथं आह्निकं श्रदं॥ श्रीसरस्वत्यै नमः॥ प्रातः सुप्तोत्थानानंतरं॥ तत्र मनुः॥
सुप्त्वा क्षुत्वा तथा भुक्त्वा ष्ठीवित्वोक्त्वानृतानि च। पीत्वापो ध्येष्यमाणश्च आचामेत्प्रयतोपि सन्॥ गौतमः॥ प्राङ्मु
ख उदङ्मुखो वापि शौचमारभेत्। ध्यानि चोपस्पृशेत्। शीर्षण्यान्यानि मूर्द्धनि च दद्यात्॥ सुप्त्वा क्षुत्वा च भुक्त्वा च वामे
दित्यनुवृत्तौ॥ शंखलिखितौ॥ उताभिः परिपूताभिरङ्भिरवह्निताभिरनधिश्रिताभिरफेनाभिरबुद्बुदाभिर्नेष्मूष्माश्रुच्यैक
पाण्या विवर्जितानि॥ बोद्धायनः॥ पादप्रक्षालनात्शेषेण नाचामेत्। यद्याचामेत्भूमौ स्नावयित्वा चामेत्॥ व्यासः॥॥
शिरः प्रावृत्य कंठं स्तु मुक्तकच्छशिखोपि वा। अकृत्वा पादयोः शौचमाचान्तोप्यशुचिर्भवेत्॥ आपस्तंबः॥ न वर्षधारास्वा
चामेत्॥ तथा प्रदोषोदके तप्ताविष्याकरणात्॥ देवलः॥ शिखां बध्वा वसित्वा द्वे वाससी निर्लिके शुभे॥ तूष्णीं स्वासमाध
यनोञ्छन्न विलोकयन्॥१॥ न गच्छन्न शयानश्च न च लग्नः परान्स्पृशन्। न हसन्न च संजल्पन्नात्मानं चैव वीक्षयन्॥२॥ केशा
न्नाभिमधः कायमस्पृशन्धरणीरपि। यदि स्पृशेच्चरणे तानि भूयः प्राचामेत्। प्रक्षालयेत्करं॥ ह्येवमंगिरा॥ आजानुभ
द्वाल्य चरणौ पृथक् कृत्वा हस्तौ वामनलिबंधयां पश्चादासीसतं यतः॥ द्विस्ततोंगुष्ठमूलेन परिमृज्यात्ततो मुखं नाग्रांगुल्या
न पृष्ठेनापि परिमृज्यात्कथंचन॥ ततः खान्यंगुलिस्पर्शात् कूपाणेः श्रोत्रनाभिषु मूर्द्धानं चरणौ चाद्भिः संस्पृश्य शुचिर्भवेत्॥
नरसिंहपुराणे। दक्षिणं तु करं कृत्वा गोकर्णाकृतिवत्पुनः॥ त्रिः पिबेद्वीक्षितं तोयमास्यं द्विः परिमार्जयेत्॥ मनुः॥ ब्राह्मेण विप्रती
र्थेन नित्यकालमुपस्पृशेत्। कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन॥ वचरादि स्पृशे॥ दक्षः॥ अंगुष्ठेन प्रदेशिन्या घ्रा
णं पश्चादनंतरं। अंगुष्ठानामिकाभ्यां तु चक्षुःश्रोत्रं पुनः पुनः॥ नाभिं कनिष्ठांगुष्ठेन हृदयं तु तलेन वै। सर्वाभिस्तु शिरः पश्चा
द्बाहू चाग्रेण संस्पृशेत्॥ अथ मूत्रपुरीषोत्सर्गः॥ विष्णुपुराणे॥ ततः कल्पं समुत्थाय कुर्यान्मूत्रं नरेश्वर। नैरृत्यामिषुवि
क्षेपमतीत्याभ्यधिकं भुवः। दूरादावसथान्मूत्रं पुरीषं च समुत्सृजेत्॥ तिष्ठेन्नाति चिरं तत्र न च किंचिदुदीरयेत्॥ याज्ञवल्क्यः॥

श्रीः ८१॥

© Dharmartha Trust J&K. Digitized by eGangotri

दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्रपुरीषे तु रात्रौ तु दक्षिणामुखः॥ यमः॥ शिरः प्रावृत्य कुर्वीत सकृन्मूत्रविसर्जयेत्।
अयज्ञियैरनार्द्रैश्च तृणैः संछाद्य मेदिनीं। प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्। दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा॥ याज्ञव
ल्क्यः॥ गृहीतशिश्नश्चो० कुर्यादतंद्रितः॥ मनुः॥ एका लिंगे गुदे तिस्रस्तथैकत्र करे दश। उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥ ब्रह्म
पु०॥ पादयोर्द्वे गृहीत्वाथ सुप्रक्षालितपाणिना। त्रिराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनं॥ आपस्तंबः॥ अद्भिः शौचं यथाप्रोक्तं नि
शार्द्धं तस्य चेष्यते। पथि पादस्तु विज्ञेयः आर्तः कुर्याद्यथाबलं॥ ऋष्यशृंगः॥ यस्मिन्स्थाने कृतं शौचं वारिणा तत्र शोधयेत्। न शुद्धिस्तु
भवेत्तस्य मृत्तिका यो न शोधयेत्। विष्णुपुरा०॥ वल्मीकमूषिकोत्खातां मृदमंतर्जलात्तथा। शौचावशिष्टां गेहाच्च नादद्याल्लेपसंभवां॥ अं
तःप्राप्यवपन्नाश्च हलोत्खातां च पार्थिव। परित्यजेन्मृदो ह्येताः सकलाः शौचसाधने॥ अथ दंतधावनं॥ दक्षः॥ उषाकाले तु संप्राप्ते शौचं
कृत्वा यथार्थवत्। ततः स्नानं प्रकुर्वीत दंतधावनपूर्वकं॥ नरसिंहपुराणे॥ खदिरश्च कदंबश्च करंजश्च वटस्तथा। तिंतिणी वेणुपृष्ठश्च आम्र
निंबौ तथैव च। अपामार्गश्च बिल्वश्च अर्कश्चोदुंबरस्तथा। एते प्रशस्ताः कथिता दंतधावनकर्मणि॥ दंतकाष्ठस्य वक्ष्यामि समासेन प्रशस्त
तान्वृक्षकंटकिनः पुण्याः क्षीरिणश्च यशस्विनः॥ अष्टांगुलेन मानेन तत्प्रमाणमिहोच्यते। प्रादेशमात्रमथवा तेन दंतान्विशोधयेत्॥
प्रतिपद्दर्शषष्ठीषु नवम्यां चैव भारत। दंतानां काष्ठसंयोगाद्दहत्यासप्तमं कुलं। अलाभे दंतकाष्ठानां प्रतिषिद्धेथवा दिने। अपां द्वादश
गंडूषैर्मुखशुद्धिर्भविष्यति॥ छंदोगपरिशिष्टे॥ का०॥ उत्थाय नेत्रे प्रक्षाल्य०॥ आयुर्बलं यशो वर्चः०॥ अथ प्रातःस्नानं॥ अत्यंतमलिनः का
यो नवच्छिद्रसमन्वितः। स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनं॥ प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हि तत्। सर्वमर्हति शुद्धात्मा प्रातः
स्नायी जपादिकं॥ विष्णुः॥ अलक्ष्मीकालकर्णी च दुःस्वप्नं दुर्विचिंतितं। अम्मात्रेण निषक्तस्य नश्यंत इति धारणा॥ मनुः॥ मैत्रं प्रसाधनं
स्नानं दंतधावनमंजनं। पूर्वाह्न एव कुर्वीत देवतानां च पूजनं॥ कात्यायनः॥ श्रोत्रियं सुभगां गां चाग्निमग्निचितं तथा। प्रातरुत्थाय
यः पश्येदापद्भ्यः स प्रमुच्यते॥ नारदः॥ लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः। हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥ एता
न्सततं पश्येन्नमस्येदर्चयेच्च यः। प्रदक्षिणं च कुर्वीत तथास्यायुर्न हीयते॥ वाराहपुराणे॥ उदयान्निःसृतं सूर्यं यस्तु भक्त्या नरो द्विजः॥ द

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यहृतां जलान्निस्तु तिस्रन्निःसृरयेत्तु वि॥ तदाभावप्रपन्नस्य अश्रुतं यस्समर्जितं। ततहृणा देवनिर्द्दग्धं नस्मीनवृति तस्य तत्। दक्षः॥
द्वितीये च तथा भागे वेदाभ्यासो विधीयते। वेदस्वीकरणं पूर्वं विचारोभ्यसनं जपः। तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा। समित्पु
ष्पकुशादीनां स कालः समुदाहृतः॥ तृतीये च तथा भागे पोष्यवर्गप्रसाधनं। माता पिता गुरुर्भार्या प्रजादीनः समाश्रितः॥ अन्योपिधु
नयुक्तस्य पोष्यवर्ग उदाहृतः॥ योगाद्वेमार्थमात्मरमधिगछेन्नान्यमन्यत्र देवगुरुधार्मिकेभ्यः॥ दक्षः॥ चतुर्थे च तथा भागे स्नानार्थं
मृदमाहरेत्। तिलपुष्पकुशादीनां स्नानं चाकृत्रिमे जले॥ मृत्तिकाः सप्त न ग्राह्या वल्मीके मूषिकस्थले। अंतर्जले श्मशाने च वृक्षमू
ले सुरालये। परस्नाना वृक्षशिष्टा च श्रेयस्कामैः सदा बुधैः॥ नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तेषां मध्ये तु यन्नित्यं तत्पुन
र्भिद्यते त्रिधा॥ मलापकर्षणं प्राश्च मंत्रवत्तु जले स्मृतं। संध्यास्नानमुभाभ्यां च स्नानदेशाः प्रकीर्त्तिताः॥ नित्यं नैमित्तिकं काम्यं क्रि
यामंगलकर्षणं। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितं॥ अस्नातस्तु पुमान्नार्हो जप्याग्निहवनादिषु। प्रातः स्नानं तदर्थं तु नि
त्यस्नानं प्रकीर्त्तितं॥ चंडालशवयूपादि स्पृष्टास्नानं रजस्वलां। स्नानार्थस्तु यस्नाति स्नानं नैमित्तिकं हि तत्। पुष्यस्नानादिकं यत्तु दै
वज्ञविधिदेशितं। तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत्॥ जप्तुकामः पवित्राणि अर्चिष्यन्देवताः पितॄन्। स्नानं समाचरेद्यस्तु क्रि
यांगं तत्प्रकीर्त्तितं॥ मलापकर्षणं नाम स्नानमभ्यंगपूर्वकं। मलापकर्षणार्थं तु प्रवृत्तिस्तस्य नान्यथा॥ सरःसु देवखातेषु तीर्थेषु च
नदीषु च। क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया॥ तत्र काम्यं तु कर्त्तव्यं यथावद्विधिवेशितं। नित्यं नैमित्तिकं चैव क्रियामंगल
षणं॥ तीर्थाभावे तु कर्त्तव्यमुष्णोदकपरोदकैः॥ योगियाज्ञवल्क्यः॥ कालदोषादसामर्थ्यान्नशक्नोति यदा ह्यसौ। तदा ह्यात्रऋषिभि
र्मंत्रैर्दृष्टं तु मार्जनं॥ शन्न आपस्तु द्रुपदा आपो हि ष्ठाघमर्षणं। एतैस्तु त्रिर्वामंत्रैर्मंत्रस्नानमुदाहृतं॥ जाबालिः॥ अशिरस्कं भवे श्रीः
त्स्नानं स्नानाशक्तौ तु कर्मिणां। आर्द्रेण वाससा वापि मार्जनं देहिकं विदुः॥ विष्णुः॥ उद्धृतान्भूमिस्थमुदकं पुण्यं स्थावरात्स्राव ॥२॥
त्स्मान्नादेयं तस्मादपि साधुपरिगृहीतं सर्वत एवं गांगं॥ याज्ञवल्क्यः॥ पंचपिंडाननुद्धृत्य न स्नायात्परवारिषु॥ मनुः॥ न स्नानमा
चरेद्भुक्त्वा नातुरो न महानिशि। न वासोभिः सहाजस्रं नाविज्ञाते जलाशये॥ योगयाज्ञवल्क्यः॥ प्रकृत्तुमसमर्थश्चेज्जुहोति यजति क्रियाः

© Dharmartha Trust J&K. Digitized by eGangotri

स्नानध्यानजपैर्होमैरात्मानं शोधयेद्द्विजः॥ यदि स्नानं च कुरुते विशुद्धेनांतरात्मना। तेनैव सर्वमाप्नोति विधियज्ञक्रियाफलं॥ वाराह॥
दक्षिणावर्त्तशंखेन तिलमिश्रोदकेन तु उदकेनाभिमात्रेण तु यः कुर्यादभिषेचनं॥ प्राक्स्रोतसि तु वेनर्घां नरस्तिष्ठे काममानसः॥ या
वज्जीवकृतं पापं तत्क्षणादेव नश्यति॥ अच्छिन्नपद्मपत्रेण तिलमिश्रोदकेन तु। स्रोतसे वे नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ दक्षि
णावर्तशंखेन पात्रे औदुंबरे स्थितं। उदकं यः प्रतीच्छेत शिरसा हृष्टमानसः। तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति॥॥
गोभिलः॥ ॥ॐ अथ स्नानविधिं व्याख्यास्यामो नदीदेवखातगर्त्तप्रस्रवणान् गत्वेति॥ पावकानस्त्यस्य मंत्रस्य भरद्वाज ऋ
षिः गायत्री छंदः। इन्द्रो देवता। तीर्थनमस्कारे विनियोगः॥ पावकानः धियावसुः॥ अस्यार्थः॥ सरस्वती नदी। पावका पावयित्री वा
जिनीवती। वाजोन्नं तत्कारणं तया वाजिनी पृथ्वी तद्वती वाजिनीवती तया सह इतास्त्यर्थः। एवंभूता सरस्वती नोऽस्माकं यज्ञं वष्टु
वहतु। यज्ञं वष्ट्वित्येतदाह ब्राह्मणं। वशेः कांतिकर्मणो रूपमिति केचित्। तस्मिन्नपि पक्षे कामनाद्वारेण यज्ञवहनं लक्षणीयं। वो
ढुभिः साधनैः। वाजोन्नाति। अनेन वान्नकरणभूता मदन्नापि पश्यसेत्यंते। धियावसुः धीशब्दः कर्मवचनः॥ सारस्वतस
त्राख्येन कर्मणा सह वसतीति तथोच्यते सरस्वत्यनया तीर्थं नमस्कृत्य॥ छ॥ पादौ वारभ्य मृद्भिर्गात्राणि प्रक्षाल्योपविश्य ब
द्धशिखी यज्ञोपवीती प्राङ्मुख उदङ्मुखो वा कुशहस्तः शुचिः समाहितो भवेत्॥ सप्तव्याहृतीनां प्रजापतिरृषिः गायत्र्युष्णिगनुष्टु
प्बृहती पङ्क्तिस्त्रिष्टुब्जगत्यश्छंदांसि। अग्निवाय्वादित्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः। जपे विनियोगः॥ ॐ भूः ॐ भुवः ॐ
स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं। सप्तव्याहृतयो भूरादीनां लोकानां प्रतिपादिकाः। प्रणवो ब्रह्मणः॥ तत्सवितुरिति विश्वामित्र
गायत्री अग्निः। जपे विनियोगः। ॐ तत्सवितुः प्रचोदयात्। अस्यार्थः। यः सविता सूर्यो देवो नः अस्मदीयो धियो धर्मादिविषयाः
प्रचोदयात्। प्रेरयति। तस्य देवस्य सवितुः संबंधितन्मंडलवर्ति वरेण्यं वरणीयं। भर्गः पापभंजनहेतुभूतं। ब्रह्म धीमहि। उपास्म
हे। तदिति ब्रह्मणो नाम। अत्राभियुक्तः श्लोकः॥ यो देवः सविताऽस्माकं धियो धर्मादिगोचराः॥ प्रेरयत्तस्य भर्गस्तद्वरेणीयमु

© Dharmartha Trust J&K. Digitized by eGangotri

पास्महे॥इतिसप्तव्याहृतीःसप्तपएवतीस्तथासावित्रीमेकांजप्त्वासावित्र्याःप्रागुक्तरुषादिकार्यया अनुक्तैर्मंत्रणेविनि
योगं चावगम्य करस्थमुदकं सप्तरूपो नु मंत्रयथाविधिसकृदाचामेत्॥ ॥छ॥ ततोऽभिमतदेवताभिसंध्यायसहस्रशीर्षोऽत्र
चः पुरुषऋषिरनुष्टुब्विष्णुः मृद्दाने विनियोगः॥सहस्रशीर्षा० दशांगुलं॥अस्यार्थः॥प्रपंचोत्पत्तेः पूर्वमेवसाम्नेतिपुरुष
एवलभ्यते।ब्रह्म।सपुरुषः प्रपंचावसरेसहस्रशीर्षाः सहस्राक्षः सहस्रपादोभूत्वासएवभूमिंसर्वतोवृत्वाविचार्यभूमेः
सकाशाद्दशांगुलमाकाशदेशमतीत्योदतिष्ठत्।तदेवंभूतगुणकीर्तनेनपुरुषस्तुतिःस्तसंबंधेन भूमेरपि॥तत्रब्राह्म
णं।पूर्वमेवाहमिहासमितितत्पुरुषत्वंसहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात्।भूत्वोदतिष्ठमिति।तत्रापरत्वादाब
ह्मेवृजीवात्मनापुरिमतिशेतइतिपुरुषस्तस्यचप्रपंचात्मनाबहुशिरस्त्वंसहस्रशब्दश्चबहुपर्यायः अत्यतिष्ठदितिद
शांगुलेहृदयेध्येयइत्यभिप्रायेणेति॥२॥घृतवतीःऋच०१ वरुणजगतीद्यः मृद्दादाने वि०।ॐ घृतवतीभुवनानां० भूरिरेतसा॥
अस्यार्थः॥उदकवत्यौ द्यावापृथिव्यौ।घृतमित्युदकनाम।भुवनानामभिश्रिया।भुवनान्युदकानि तेषां अभितः उभयत
ऊर्ध्वं अधश्चसंश्रितेनिदाघेपार्थिवमुदकंदिवमुद्गच्छति।वर्षासुदिव्यंभुवमागच्छति।अभिश्रियेतिश्रिया।प्रथमाद्विवचनं विभ
क्त्यादेश आकारः॥अथवा अभिश्रिया अभिश्रियेन प्रकारेण वीत्ये वंतृतीयासहयोगेवा उर्वीपृथ्वी विस्तृते।सुपेशसापेशइ
तिरूपनाम।कल्याणरूपेवृक्षस्यादीनिपृथिवीरूपाणिनक्षत्रादीनिदेवः।मधुदुघेमधुनउदकस्तदोग्ध्र्यौ द्यावापृथि
व्योइतिविशेषपदे।सर्वत्रपृथमार्थे।वरुणस्यधर्मणासूर्यस्यविधारकेण विष्णुनाविष्कभितेतेते विविध्यस्ते भितेअजरे श्रीं
अजररहिते।भूरिरेतसाप्रभूतेनरेतसायुक्तोरेतइत्युदकनाम।केल्यौ अत्रविष्णुसंबंधात्॥द्यावापृथिवीस्तुतिः॥ॐ अश्वक्रां ॥३॥
तेरथक्रांते विष्णुक्रांतेवसुंधरि।मृत्तिकेहरमेपापंयन्मयादुःकृतंकृतं।त्वांवगृह्णामि।वर्द्धं पूरणे।प्रजयाचधनेनचयुक्तोभू
यासमितिविशेषः॥अनेनचमृदमादाय।इदंविष्णुर्विचक्रमइत्यादिषड्वस्यविष्णुर्गायत्रीविष्णुः मृदोमार्जने वि०॥इदंविष्णु
पा०सुले॥अस्यार्थः॥इदंलोकत्रयविष्णुर्विचक्रमेविशिष्टैः क्रमैराक्रामीत्।कथंत्रेधानिदधेपदं।पृथिव्यांअन्तरिक्षेदिवीत्येवं

© Dharmartha Trust J&K. Digitized by eGangotri

तत्रपदमस्यलोकमंहोहस्यस्वभूतेपाःस्तुलेकलिसमूढेसंमूढंसंज्ञातंसंस्तुमितियावत्॥१॥ त्रीणिपदा॰धारयन्। अस्यार्थः॥ त्री
ण्यपदविचक्रमेपात्विष्णुर्विचक्रमे। गोपागोप्ताधर्माधर्माणि। अदाभ्यः। अदिंभ्यः। अतोधर्माणिधारयन्। अतःपृथिवीमारभ्यविराट्
स्थानंयावत्धर्मान्पागादावधारयितुंतेपृथिव्यामनुष्ठीयन्तेउत्तरेषुलोकेषुयुगादीनांफलानिभुज्यन्ते इत्येवं॥२॥ विष्णोःक
र्माणि॰युज्यःसखा। अस्यार्थः॥ पश्यतसाक्षात्साक्षात्कुरुत। हेधर्मानुष्ठातारः यतःपृथिवीतआरभ्यव्रतानिपस्पशे। व्रत
कर्मपश्यतिरूपेणार्थेकर्माणिक्रियमाणानिभुज्यमानानिसम्यक्निरूपयति। इंद्रस्यसखायुज्योय। गयोग्यः। योविष्णुःत
स्यकर्माणिपश्यति। यच्छब्दाध्याहारेणएकवाक्यता॥३॥ तद्विष्णोःपरमंउत्कृष्टंपदंतंसदापश्यंतिसाक्षात्कुर्वंतिसूरयोज्ञा
निनःनकर्ममात्रपर्यवसायिनः। कथंपश्यंति। उच्यते। दिवीवचक्षुराततं। अक्षिसूर्यावलोकमासाद्यसमंताद्विस्तृतंचक्षुर्य
नावृत्तिर्यथारूपादीन्साक्षात्करोतितद्वदितिशेषः॥४॥ उं तद्विप्रासो॰परमंपदं॥ अस्यार्थः॥ विष्णोर्यत्परमंतद्विप्रासोमे
धाविनःविपन्यवःपन्यतिरर्चतिकर्मा वर्णाश्रमविहितैःधर्मैर्विविधंस्तुवंतो जागृवांसोजागरूकाः। संसारभयोद्वेगे
नप्रबुद्धाःसमिन्धितेसंदीपयंति। अभेदंयावद्ध्यायंतीत्यर्थः॥५॥ उं अतोदेवा॰अविसानवि। इतिपाठेपृथिव्याउपरिउत्क
तेदेशेमेरुपृष्ठेदेवाअवंत्वितियोजना। आभिःषड्भिःऋग्भिःतांगृहीतांमृदंसंमृज्यात्॥ उं उद्वयंतमसित्यस्यसूर्यःपङ्क्तिःसू
र्यः। मदापाणीलत्वासूर्यविष्णोविनियोगः। उं उद्वयंत॰ज्योतिरुत्तमं। अस्यार्थः। सूर्योदेवतातमसस्परिनैशात्तमसःउप
रिज्योतिःसूर्यप्रकाशंउद्वयंवयंपश्यंतःसूर्यमगन्मेतिसंबंधः। आशंसायांभूतवच्चेत्यवगच्छेमेत्यर्थः। कीदृशंज्योति
रुत्तममुत्कृष्टं। स्वःपश्यंतउत्तरं। स्वरितिसूर्यनामज्योतिर्मध्येसूर्योदेवमुत्कृष्टं। देवत्रादेवपूजायांपश्यंतःसूर्यमगन्मे
तिसंबंधः। ततश्चसूर्यमंडलंभित्वोत्तमंज्योतिर्ब्रह्माख्यमगन्मेतिवाक्यसमाप्तिः॥ उं उत्तमंमि नीत्यस्यवरुणगोतमावृषीत्रि
ष्टुप्वरुणअदितिर्देवआदित्यावेदप्रणेवि॰। उं उदुत्तमं॰स्याम। अस्यार्थः। शुनःशेपेकिलहरिश्चंद्रराजसूयेनिषेचनीये
हनियूपेपादयोर्मध्येकंठेचत्रिभिःपाशैर्बद्धो [illegible] णअत्तमेपाशंउदुत्तमंसस्यतंपाशं॥ उं कृष्ण

© Dharmartha Trust J&K. Digitized by eGangotri

या।ऊर्द्धंयथागच्छतितथास्त्रंकुरु।अवतीत्युपसर्गद्वयेपिअस्त्रयेतिक्रियापदमावर्त्तनीयं।अधर्मपाशमस्मत्तःसकाशाद

© Dharmartha Trust J&K. Digitized by eGangotri